

# वातापि गणपतिं भजेहं-रागम्: हंसध्वनि (स, रि2,

https://www.chalisa.online

|| वातापि गणपतिं भजेहं ||
रागम्: हंसध्वनि (स, रि2, ग3, प, नि3, स)
वातापि गणपतिं भजेऽहं
वारणाश्यं वरप्रदं श्री ।
भूतादि संसेवित चरणं
भूत भौतिक प्रपंच भरणं ।
वीतरागिणं विनुत योगिनं
विश्वकारणं विघ्नवारणं ।
पुरा कुंभ संभव मुनिवर
प्रपूजितं त्रिकोण मध्यगतं
मुरारि प्रमुखाद्युपासितं
मूलाधार क्षेत्रस्थितं ।
परादि चत्वारि वागात्मकं
प्रणव स्वरूप वक्रतुंडं
निरंतरं निखिल चंद्रखंडं
निजवामकर विद्रुतेक्षुखंडं ।
करांबुज पाश बीजापूरं
कलुषविदूरं भूताकारं
हरादि गुरुगुह तोषित बिंबं
हंसध्वनि भूषित हेरंबं ।

|| https://www.chalisa.online ||